# शब्दविमर्शः - क्वरप्प्रत्ययान्तशब्दानामवलोकनम् ।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## 1. जित्वरः ।

यदि नलः सौन्दर्यातिशयेनोपमानबाह्यस्तर्हि दमयन्त्या लावण्यवर्णनं नाम दुष्करम्। यतस्तदनुरूपैव खलु तत्पत्नी। निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय।। इति नैषधमेतन्मनसि निधायोक्तम् (३.४८)। एवं योग्ययोस्समागतयोर्मध्ये नलस्य मुखस्य नेत्रयोश्चोपमा नास्तीत्याह स्वकेलिलेशस्मितनिर्जितेन्दुनो निजांशदृक्तर्जितपद्मसम्पदः। अतद्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे।। इति नैषधम्। (१.२३)।। नलमुखस्योपमानं स्थावरजङ्गमात्मके जगति नास्तीति भावः। स्वकीयायाः क्रीडाया लवभूतं यत्स्मितं तेन निन्दितो निर्जित इन्दुर्येनेति चन्द्रस्योपमानत्वं निराचकार। तथा स्वकीयांशभूताभ्यां नेत्राभ्यामधःकृता पद्मानां सम्पत् समूहः सौभाग्यं वा येनेति पद्मानामप्युपमानत्वं निराचकार। चन्द्रपद्मातिरिक्तमन्यदुपमानं भविष्यतीति चेत्तत्राह अतद्वयीति चराचरविशेषणम्। तयोश्चन्द्रपद्मयोर्द्वयी तद्द्वयी तस्या जित्वरं जयनशीलम्। न विद्यते तद्द्वयीजित्वरं सुन्दरान्तरमन्यत्सुन्दरं वस्तु यस्मिन्। जगति मुखस्योपमानं द्वयं चन्द्रः पद्मं च। तदतिरिक्तं वस्त्वन्तरं नास्ति। तद्द्वयमेतन्मुखेनांशभूतेन स्मितेन चक्षुर्द्वयेन च निर्जितमिति समग्रस्य तन्मुखस्योपमानं नास्तीत्यर्थः। जित्वरशब्दं दिदर्शयिषता काव्येभ्य उदाहृतम्। शूरो वीरश्च विक्रान्तो जेता जिष्णुश्च जित्वर इत्यमरः।

भट्टिकाव्ये रामलक्ष्मणादीनां बाल्यावस्थावर्णनाप्रसङ्गे कथं ते भिन्नवृत्तीनामपि जनानां मनस्सु चिरं प्रतिष्ठिता बभूवुरिति प्रदर्शयति वेदोऽङ्गवांस्तैरखिलोऽध्यगायि शस्त्राण्युपायंसत जित्वराणि। तं भिन्नवृत्तीन्यपि मानसानि समं जनानां गुणिनोऽध्यवात्सुः।। इति भट्टिकाव्यम् (१.१६)। शिक्षा कल्पो व्याकरणं छन्दोविवृतिर्निरुक्तम्। ज्योतिषं चेति षडङ्गानि शास्त्राणि तानि विद्यन्ते यस्य वेदस्येत्यङ्गवान्। स च निःशेषो वेदस्तैरुपनीतै रामादिभिरधीत इति भावः। ततो वेदाध्ययनानन्तरं धनुरादीनि शस्त्राणि तैः स्वीकृतानि। तानि च शस्त्राणि कीदृशानीत्युक्तौ जित्वराणीति। अप्रत्यावृत्तान्यत एव जयशीलानि इति यावत्। ततस्ते रामादयो गुणिनो मानसानि नानाविधविषयप्रवृत्तीन्यपि सममध्युषितवन्तः। शास्त्रं शत्रवो जनमनांसि च तैरात्मसात्कृतानीति भावः। जित्वरशब्दोऽत्रावधेयः। 'जि जये' (भ्वा.५६१) इत्यस्मात् 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति तत्साधुकारिण्यर्थे क्वरप्प्रत्ययः। शत्रुनिषूदनं साधु कुर्वन्तीत्यर्थः।

ततस्तत्रैव भट्टिकाव्ये मारीचादिराक्षसनिग्रहानन्तरं मुनिजनरक्षणनिरतं रामं मुनिः गाधेयो बभाष। यतो हि यागविघ्नकारिषु निरस्तेषु द्विजानां मानसानि प्रसादमव्याकुलत्वं जग्मुः। अथ किमसौ गाधेयो बभाषेत्याह महीय्यमाना

भवताऽतिमात्रं सुराध्वरे घस्मरजित्वरेण। दिवोऽपि वज्रायुधभूषणाया हृणीयते वीरवती न भूमिः।। इति भट्टिकाव्यम् (२.३८)। किञ्चिद्विवृणुमहे। भवता इयं पृथिवी पूज्यमाना। तत्रातिशयत्वमुच्यते सुष्ठु पालनात्स्वर्गस्यापि न लज्जते किन्तु प्रतिस्पर्द्धत इति भावः। कीदृशोऽसौ स्वर्ग इत्युक्ते वज्रायुधभूषणः शक्र एवालङ्कारो यस्येति। कीदृशेन च भवता भूमिः महीय्यमानेत्युक्तौ सुराध्वरे सुरानुद्दिश्य योऽध्वरो यज्ञः क्रियते तत्र। ये घस्मराः अदनशीला राक्षसाः। तेषां जित्वरेण जयशीलेन भवता। त्वद्विधवीरवती खलु भूमिरित्यर्थः। इन्द्रातिशायित्वं भवताम्। अत एव भवत्पालितायाः भूमेः इन्द्रपालितादपि स्वर्गान्महत्वमित्याशयः। जित्वरशब्दः प्रयुक्तोऽवधार्यताम्। ननु कथं घस्मर इति। अप्यसौ क्वरबन्तः ? नहि। अत्र ‘सृघस्यदः क्मरच्’ (३.२.१६०) इति क्मरच्प्रत्ययः। स चान्यो विषयः। कदाचिदग्रे विशदं द्रक्ष्यामः।

अन्यत्र भट्टिकाव्ये वर्षाकाले व्यतीतेऽपि रामप्रत्तेषु भोगेषु रतम् अत एव रामकार्येष्वनवधानतया स्थितं सुग्रीवमुद्बोधयितुं रामो लक्ष्मणं प्रेषयामास। यथोक्तं सृमरो भङ्गुरप्रज्ञो गृहीत्वा भासुरं धनुः। विदुरो जित्वरः प्राप लक्ष्मणो गत्वरान् कपीन्।। इति भट्टिकाव्यम् (७.२२)। लक्ष्मणः कपीन् प्राप। कथं भूतो लक्ष्मण इत्युक्तौ। सृमरः। साधु गन्ता। पुनश्च भङ्गुरप्रज्ञः। भङ्गुरा ये स्वयमेव भज्यन्ते। तान् प्रजानातीति भङ्गुरप्रज्ञः। विदुरः। साधु वेदी। जित्वरो जयशीलः। भासुरं भासनशीलं धनुः गृहीत्वा। गत्वरान् गमनशीलान् कपीन् अस्थिरप्रकृतीनित्यर्थः। लक्ष्मणः प्रापेत्यन्वयः। जित्वरशब्दोऽवधार्यताम्। ननु कथं सृमरादयः जित्वरसदृशाः शब्दा येषां व्युत्पत्तौ मूको भवान्। न तथा। एते शब्दाः न क्वरबन्ताः। अत एतेषां विषये किमपि नोक्तम्। यथा सृमर इत्यत्र ‘सृघस्यदः क्मरच्’ (३.२.१६०) इति क्मरच्प्रत्ययः। भङ्गुर भासुर इत्यनयोः ‘भञ्जभासमिदो घुरच्’ (३.२.१६१) इति घुरच्। विदुर इत्यत्र ‘विदिभिदिच्छिदेः कुरच्’ (३.२.१६२) इति कुरच्। गत्वर इत्यत्र ‘गत्वरश्च’ (३.२.१६४) इति निपातितम्। किं निपातितम्। क्वरबन्तता। तच्चाग्रे विशदं वक्ष्यामः। इदमिदानीं प्रकृतमनुवर्तामहे।

व्याकरणशास्त्राध्यापनार्थं प्रवर्तिते भट्टिकाव्ये प्रायशः समेषामपि प्रयोगाणां निदर्शनान्युपलभ्यन्ते। सम्प्रति क्वरबन्तशब्दानां प्रयोगान् काव्यान्तरेषु अनुसन्दध्महे। यथा कुमारसम्भवे तारकासुरवधोद्युक्तं देवसेनापतिमभिधत्ते चमूपतिं मन्मथमर्द्दनात्मजं विजित्वरीभिर्विजयश्रिया श्रितम्। श्रुत्वा सुराणां पृतनाभिरागतं चित्ते चिरं चुक्षुभिरे महासुराः।। इति कुमारसम्भवम् (१५.२)। महासुरास्तारकनगरनिवासिनो दैत्या विजयलक्ष्म्या सेवितं तं कार्तिकेयं विजित्वरीभिर्जयशीलाभिः देवसेनाभिः सहायातं श्रुत्वा बिभ्युरित्यर्थः। बालं तं देवसेनाधिपमवेक्ष्य क्रूरकर्माणो राक्षसाः बिभ्युरित्युक्तं विचित्रं मा स्म मन्यत। यतो ह्यसौ विजयश्रिया श्रितः। एतेनास्य कादाचित्कोऽपि पराभवो न भवतीति ध्वनितम्। अपि च मन्मथमर्द्दनात्मजः। अनेन यदीयः पिता सकलभुवनजेतुर्मकरध्वजस्यापि प्लोषिता। अतोऽस्य किं वक्तव्यम्। तारकेणाप्ययं दुर्जेय इति ध्वनितम्। विजित्वरीभिरित्यत्र विपूर्वाज्जयतेः ‘इण्नशजिसर्त्तिभ्यः क्वरप्’ (३.२.१६३) इति क्वरप्। तस्मिन्परे ‘ह्रस्वस्य पिति कृति तुक्’ (६.१.७१) इति तुगागमः। ततो ‘टिड्ढाणञ्’ (४.१.१५) इत्यादिना ङीप्।

तत्रैव कुमारसम्भवे अशुभाननेकानवेक्ष्य अथोपदेशाँश्चावमन्यमानः तारकासुरो न न्यवर्तत तदा अम्बरान्मरुतां सरस्वती अभूत्। मदान्ध मा गा भुजदण्डचण्डिमावलेपतो मन्मथहन्तृसूनुना। सुरैः सनाथेन पुरन्दरादिभिः समं समन्तात्समरं विजित्वरैः।। इति कुमारसम्भवम् (१७.३३)। भो मदान्ध भुजदण्डयोर्यश्चण्डिमा प्रचण्डत्वं तेन योऽवलेपो गर्वः। तस्मात्। विजित्वरैर्जयनशीलैः पुरन्दरादिभिः सुरैः समन्तात्परितः सनाथेन सहितेन मन्मथहन्तृसूनुना शिवपुत्रेण सह योद्धुमिति शेषः। मा गा मा याहि इति सारः। प्राग्वदिहापि विजित्वरैरित्यत्र विपूर्वाज्जयतेः 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति क्वरपि 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुक्।

शिशुपालवधे यियक्षमाणेन युधिष्ठिरेणाहूतः अभिचैद्यं प्रतिष्ठासुश्चासौ सुरकार्यसुहृत्कार्यरूपेण कार्यद्वयेनाकुलो विप्रतिषेधादावश्यकत्वाच्च द्वयोः सन्दिहानः कृष्णः कार्यविप्रतिषेधं निवेद्य तत्र स्वमतमावेदयति। करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम्। विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः।। इति शिशुपालवधम् (२.९)। दिशां जित्वरैः जयनशीलैः भ्रातृभिर्भीमादिभिः वशीकृतराजमण्डलो धर्मपुत्रः अस्माभिर्विनापि यागाय समर्थः। अतो जैत्रयात्रैव कार्या न यज्ञयात्रेति भावः। प्राग्वदिहापि जित्वरैरित्यत्र जयतेः 'इण्नशजिसर्त्तिभ्यः क्वरप्' (३.२.१६३) इति क्वरपि 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१) इति तुक्।

*